इति राजनिर्घण्टः ॥ (अश्वदेहस्थचिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य क्षेत्रजः पुत्त्रविशेषः । यन्नाम्नैव पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ।
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ४ । ३ । ९६ । इति कन् ।) माधवीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥")
तिलकवृक्षः । (पुण्ड्र + स्वार्थे कन् ।) इक्षुभेदः । पुँड़ि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदालिका ७ करङ्कशालिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रुचिकारित्वम् । मृदुत्वम् । पित्तदाहहरत्वम् । वृष्यत्वम् । तेजोबलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (अश्वशरीरस्थचिह्नविशेषे, पुं, क्ली । यथा, अश्ववैद्यके । ३ । ७३—८१ ।

"अत ऊर्द्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्ब्ब्या यथादृष्टं मुनिभिस्तत्त्ववेदिभिः ॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः ।
शरासनसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः ॥
मत्स्यभृङ्गारप्रासादस्वर्वेदीयूपसन्निभाः ।
श्रीवृक्षदर्पणाकाराः शुभदाः परिकीर्त्तिताः ॥
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ।
स धन्यः पूजितो नित्यस्त्वृजुकश्चैव यो भवेत् ॥
पर्व्वतेन्द्रपताकाभा ये च स्रग्दामसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्ब्बशास्त्रानुसारतः ।
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः ॥
काककङ्ककबन्धाहिगृध्रगोमायुसन्निभाः ।
असिताः पीतका रक्ताः पुण्ड्रका नैव पूजिताः ॥
तिर्य्यग्गाश्चैव विच्छिन्नाः शृङ्खलापाशसन्निभाः ।
शूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः ॥
जिह्वाकल्मषरूपाणि भस्मवर्णनिभानि च ।
पुण्ड्रकाणि न शस्यन्ते भिन्नवर्णानि वाजिनः ॥"
पुण्ड्रदेशनृपतिः । यथा, महाभारते । १ । ४ । २४ ।
"तथाङ्गवङ्गौ सह पुण्ड्रकेण
पाण्ड्यौड्रराजौ च सहान्ध्रकेन ॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हस्ती । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू + "पूञो यण्णुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् णुगागमो ह्रस्वश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारवोढुमशक्तस्य पण्डितस्य निन्दा यथा, अग्निपुराणे ।
"पण्डितेनापि किन्तेन समर्थेन च देहिनाम् ।
यत् पुण्यं भारसद्दोढुमशक्तं पारलौकिकम् ॥"
आत्मकृतपुण्यकथननिषेधो यथा,—
"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"
इति शुद्धितत्त्वे देवलः ॥ * ॥
अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ * ॥ शोभनकर्म्म । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति जटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै + कः ।) व्रतम् । तच्च उपवासादि । शास्त्रे पुण्यत्वेन पवित्रताजनकत्वेन यद्बोधितमुपवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तं भोजनाक्षारलवणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीकृष्णतुल्यपुत्त्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—

महादेव उवाच ।

"हरेराराधनं कृत्वा व्रतं कुरु वरानने ! ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि ! शुद्धे च कालेऽत्र परं नियमपूर्ब्बकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये ! ॥
गात्रं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्ब्बकम् ।
उपोष्य पूर्ब्बदिवसे वस्त्रं प्रक्षाल्य यत्नतः ॥
धौते च वाससी धृत्वा उपविश्यासने शुचौ ।
आचम्य तिलकं कृत्वा निर्व्वाप्य आह्निकं पुरः ॥
घटस्यारोपणं कृत्वा स्वस्तिवाचनपूर्ब्बकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
व्रते द्रव्याणि नित्यानि चोपहाराणि षोड़श ।
देयानि नित्यं देवेशि ! कृष्णाय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्राण्याभरणानि च ।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यवन्दनम् ॥
यज्ञसूत्रञ्च ताम्बूलं कर्पूरादिसुवासितम् ।
द्रव्याण्येतानि पूजायाश्चाङ्गरूपाणि सुन्दरि ! ॥
देवि ! किञ्चिद्विहीनेनैवाङ्गहानिः प्रजायते ।
अङ्गहीनञ्च यत् कर्म्म चाङ्गहीनो यथा नरः ॥
अङ्गहीने च कार्य्ये च फलहानिः प्रजायते ।
अष्टोत्तरशतं पुष्पं पारिजातस्य विष्णवे ।
देयं प्रतिदिनं दुर्गे ! स्वात्मनो रूपहेतवे ॥
श्वेतचम्पकपुष्पाणां लक्षमक्षतमीप्सितम् ।
प्रदेयं हरये भक्त्या बहुसौन्दर्य्यहेतवे ॥
नीलोत्पलानां लक्षञ्च देयं कृष्णाय भक्तितः ।
व्रताङ्गभूतं देवेशि ! चक्षुषो रूपहेतवे ॥
हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ।
प्रददौ केशवायैव केशसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव नाभिसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं पुटकानां सहस्रकम् ।
प्रदेयं गोपिकेशाय नासिकारूपहेतवे ॥
बन्धूकपुष्पलक्षञ्च देयं राधेश्वराय च ।
स्वस्यौष्ठाधरयोश्चैव बहुसौन्दर्य्यहेतवे ॥
मुक्ताफलानां लक्षञ्च दन्तसौर्य्यहेतवे ।
देयं गोलोकनाथाय शैलजे ! भक्तिपूर्ब्बकम् ॥
रत्नगेण्डूकलक्षञ्च गण्डसौन्दर्य्यहेतवे ।
महीश्वराय दातव्यं व्रते शैलेन्द्रकन्यके ! ॥
रत्नपाशकलक्षञ्च देयं ब्रह्मेश्वराय च ।
ओष्ठाधःस्थलरूपाय प्राणेशि ! भक्तितो व्रते ॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम् ।
देयं सर्व्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥
माध्वीककलसानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥
सुधापूर्णञ्च कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं कृष्णाय देवेशि ! वाक्यसौन्दर्य्यहेतवे ॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने ।
देयं किशोरवेशाय दृष्टिसौन्दर्य्यहेतवे ॥
धुस्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गलसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितं पद्मनालसहस्रकम् ।
देयं तनुकपालाय बाहुसौन्दर्य्यहेतवे ॥
लक्षञ्च रक्तपद्मानां करसौन्दर्य्यहेतवे ।
देयं गोपाङ्गनेशाय नारायणि ! हरिव्रते ॥
अङ्गुरीयकलक्षञ्च रत्नसारविनिर्म्मितम् ।
अङ्गुलीनाञ्च रूपार्थं देयं देवेश्वराय च ॥
मणीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥
सद्रत्नसारहाराणां लक्षञ्चातिमनोहरम्
देयं मदनमोहाय वक्षःसौन्दर्य्यहेतवे ॥
सुपक्वश्रीफलानाञ्च लक्षञ्च सुमनोहरम् ।
देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥
सद्रत्नवर्त्तुलाकारं लक्षपात्रं मनोहरम् ।
देयं पद्मालयेशाय देहस्य रूपहेतवे ॥
सद्रत्नसाररचितनाभीनालसहस्रकम् ।
प्रदेयं पद्मनाभाय नाभिसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितरथचक्रसहस्रकम् ।
नितम्बसौन्दर्य्यार्थञ्च प्रदेयञ्चक्रपाणये ॥
सुवर्णरत्नकुम्भानां लक्षञ्च सुमनोहरम्
प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे
शतपत्रस्थलाब्जानां लक्षमम्लानमक्षतम्
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ।
सुवर्णरचितानाञ्च खञ्जनानां सहस्रकम् ।
गतिसौन्दर्य्यहेत्वर्थं देयं लक्ष्मीश्वराय च ॥
राजहंससहस्रञ्च गजेन्द्राणां सहस्रकम् ।
सुवर्णच्छत्रलक्षञ्च देयं नारायणाय च ॥